# hanumadaShTottarashatanAmAvaliH 2

# હનુમદષ્ટોત્તરશતનામાવલિઃ ૨

## Document Information

Text title : hanumadaShTottarashatanAmAvaliH 2

File name : hanumadaShTottarashatanAmAvaliH2.itx

Category : aShTottarashatanAmAvalI, hanumaana

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# હનુમદષ્ટોત્તરશતનામાવલિઃ ૨

(શ્રીમદ્રામાયણ કિષ્કિન્ધાદિકાણ્ડગત હનુમદ્વિજયપરા નામાવલિઃ)

રામદાસાગ્રણ્યે નમઃ । શ્રીમતે । હનૂમતે । પવનાત્મજાય ।
આઞ્જનેયાય । કપિશ્રેષ્ઠાય । કેસરીપ્રિયનન્દનાય ।
આરોપિતાંસયુગલરામરામાનુજાય । સુધિયે । સુગ્રીવસચિવાય ।
વાલિજિતસુગ્રીવમાલ્યદાય ।
રામોપકારવિસ્મૃતસુગ્રીવસુમતિપ્રદાય । સુગ્રીવસત્પક્ષપાતિને ।
રામકાર્યસુસાધકાય । મૈનાકાશ્લેષકૃતે । નાગજનનીજીવનપ્રદાય ।
સર્વદેવસ્તુતાય । સર્વદેવાનન્દવિવર્ધનાય । છાયાન્ત્રમાલાધારિણે ।
છાયાગ્રહવિભેદકાય નમઃ । ૨૦
સુમેરુસુમહાકાયાય નમઃ । ગોષ્પદીકૃતવારિધયે । બિડાલ-
સદૃશાકારાય । તપ્તતામ્રસમાનનાય । લઙ્કાનિભઞ્જનાય ।
સીતારામમુદ્રાઙ્ગુલીયદાય । રામચેષ્ટાનુસારેણ ચેષ્ટાકૃતે ।
વિશ્વમઙ્ગલાય । શ્રીરામહૃદયાભિજ્ઞાય । નિઃશેષસુરપૂજિતાય ।
અશોકવનસઞ્છેત્રે । શિંશપાવૃક્ષરક્ષકાય ।
સર્વરક્ષોવિનાશાર્થં કૃતકોલાહલધ્વનયે । તલપ્રહારતઃ
ક્ષુણ્ણબહુકોટિનિશાચરાય । પુચ્છઘાતવિનિષ્પિષ્ટબહુકોટિનરાશનાય ।
જમ્બુમાલ્યન્તકાય । સર્વલોકાન્તરસુતાય । કપયે । સ્વદેહપ્રાપ્ત-
પિષ્ટાઙ્ગદુર્ધર્ષાભિધરાક્ષસાય । તલચૂર્ણિતયૂપાક્ષાય નમઃ । ૪૦
વિરૂપાક્ષનિબર્હણાય નમઃ । સુરાન્તરાત્મનઃ પુત્રાય । ભાસકર્ણ-
વિનાશકાય । અદ્રિશૃઙ્ગવિનિષ્પિષ્ટપ્રઘસાભિધરાક્ષસાય ।
દશાસ્યમન્ત્રિપુત્રઘ્નાય । પોથિતાક્ષકુમારકાય ।
સુવઞ્ચિતેન્દ્રજિન્મુક્તનાનાશસ્ત્રાસ્ત્રવર્ષિકાય ।
ઇન્દ્રશત્રુવિનિર્મુક્તશસ્ત્રાચાલ્યસુવિગ્રહાય ।
સુખેચ્છયેન્દ્રજિન્મુક્તબ્રહ્માસ્ત્રવશગાય । કૃતિને ।
તૃણીકૃતેન્દ્રજિત્પૂર્વમહારાક્ષસયૂથપાય ।

રામવિક્રમસત્સિન્ધુસ્તોત્રકોપિતરાવણાય ।
સ્વપુચ્છવહ્નિનિર્દગ્ધલઙ્કાલઙ્કાપુરેશ્વરાય ।
વહ્ન્યનિર્દગ્ધાચ્છપુચ્છાય । પુનર્લઙ્ઘિતવારિધયે । જલદૈવતસૂનવે ।
સર્વવાનરપૂજિતાય । સન્તુષ્ટાય । કપિભિઃ સાર્ધં સુગ્રીવમધુભક્ષકાય ।
રામપાદાર્પિતશ્રીમચ્ચૂડામણયે નમઃ । ૬૦
અનાકુલાય નમઃ । ભક્ત્યા કૃતાનેકરામપ્રણામાય । વાયુનન્દનાય ।
રામાલિઙ્ગનતુષ્ટાઙ્ગાય । રામપ્રાણપ્રિયાય । શુચયે ।
રામપાદૈકનિરતવિભીષણપરિગ્રહાય । વિભીષણશ્રિયઃ કર્ત્રે ।
રામલાલિતનીતિમતે । વિદ્રાવિતેન્દ્રશત્રવે । લક્ષ્મણૈકયશઃપ્રદાય ।
શિલાપ્રહારનિષ્પિષ્ટધૂમ્રાક્ષરથસારથયે ।
ગિરિશૃઙ્ગવિનિષ્પિષ્ટધૂમ્રાક્ષાય ।
બલવારિધયે । અકમ્પનપ્રાણહર્ત્રે । પૂર્ણવિજ્ઞાનચિદ્ઘનાય ।
રણાધ્વરે કણ્ઠરોધમારિતૈકનિકુમ્ભકાય । નરાન્તકરથચ્છેત્રે ।
દેવાન્તકવિનાશકાય ।
મત્તાખ્યરાક્ષસચ્છેત્રે નમઃ । ૮૦
યુદ્ધોન્મત્તનિકૃન્તનાય નમઃ । ત્રિશિરોધનુષશ્છેત્રે ।
ત્રિશિરઃખડ્ગભઞ્જનાય નમઃ । ત્રિશિરોરથસંહારિણે ।
ત્રિશિરસ્ત્રિશિરોહરાય ।
રાવણોરસિ નિષ્પિષ્ટમુષ્ટયે । દૈત્યભયઙ્કરાય ।
વજ્રકલ્પમહામુષ્ટિઘાતચૂર્ણિતરાવણાય । અશેષભુવનાધારાય ।
લક્ષ્મણોદ્ધરણક્ષમાય । સુગ્રીવપ્રાણરક્ષાર્થં મક્ષિકોપમવિગ્રહાય ।
કુમ્ભકર્ણત્રિશૂલૈકસઞ્છેત્રે । વિષ્ણુભક્તિમતે ।
નાગાસ્ત્રાસ્પૃષ્ટસદ્દેહાય । કુમ્ભકર્ણવિમોહકાય ।
શસ્ત્રાસ્ત્રાસ્પૃષ્ટસદ્દેહાય । સુજ્ઞાનિને ।
રામસમ્મતાય । અશેષકપિરક્ષાર્થમાનીતૌષધિપર્વતાય ।
સ્વશક્ત્યા લક્ષ્મણોદ્ધર્ત્રે । લક્ષ્મણોજ્જીવનપ્રદાય ।
લક્ષ્મણપ્રાણરક્ષાર્થમાનીતૌષધિપર્વતાય નમઃ ।
તપઃકૃશાઙ્ગભરતે રામાગમનશંસકાય । રામસ્તુતસ્વમહિમ્ને ।
સદા સન્દૃષ્ટરાઘવાય । રામચ્છત્રધરાય દેવાય ।
વેદાન્તપરિનિષ્ઠિતાય । મૂલરામાયણસુધાસમુદ્રસ્નાનતત્પરાય ।
બદરીષણ્ડમધ્યસ્થનારાયણનિષેવકાય નમઃ । ૧૦૮

(શ્રીમદ્રામાયણ કિષ્કિન્ધાદિકાણ્ડગત હનુમદ્વિજયપરા નામાવલિઃ)

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*hanumadaShTottarashatanAmAvaliH 2*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*